যদমুষ্য প্রতীকারং ন কুর্য্যাং বীর্য্যবানপি।
তদাম্বরং ন যাস্যামি যাস্যাম্বরতাং পুনঃ।।

নাটকস্য কথাবিষয়েঽপি রাণাপ্রতাপেন সহ মোগলসেনানাং যুদ্ধঃ, অন্তিমে প্রতাপস্য বিজয়গাথা বর্ণিতা।

(ঘ) **শিবাজীচরিতম্ ঃ**—শিবাজীজীবনমবলম্ব্য সিদ্ধান্তবীগীশমহোদয়েন রচিতমিদং দশাঙ্কবিশিষ্টং মহানাটকম্। অঙ্কানাং নাম যথাক্রমে সঙ্ঘসঙ্ঘটনম্, তোরণদুর্গাধিকারঃ, শাহনাথবন্দীকরণঃ ইত্যাদি। অঙ্কেষু ক্রমেণ শিবাজিয়ঃ মোগলবিরুদ্ধে বিজয়গাথা বর্ণিতা। বীররসাত্মকং নাটকমিদং অভিনয়যোগ্যম্, স্বদেশচেতনাসমৃদ্ধং চ। ভারতোদ্ধারস্য সংকল্পঃ, ধর্মরাজ্যপ্রতিষ্ঠায়াঃ সংকল্পঃ প্রতিপর্বেষু বিন্যস্তা। স্বয়ং শিবাজিয়া উক্তম্—"কুর্যামস্মিন্ পুনরপি বয়ং ধর্মরাজ্যপ্রতিষ্ঠাম্"। অনেন নাটকেন নাট্যকারস্যাপি স্বদেশপ্রীতিঃ প্রকাশিতা।

(ঙ) **বিরাজসরোজিনী ঃ**—মালবরাজস্য হরিদশ্বস্য তথা বারাণস্যাঃ রাজকন্যায়াঃ সরোজিন্যাঃ প্রণয়াকথামবলম্ব্য হরিদাসমহোদয়েন রচিতা ইয়ং নাটিকা। নাটকেস্মিন্ নাট্যকারস্য মনোবিজ্ঞানচেতনা প্রকাশিতা কতিপয়েষু শ্লোকেষু। যথা—

সরলে কুটিলাচারা সুলভে দুর্লভা পুনঃ।
মৃদুলে কঠিনী নিত্যমপমানে চ মানিনী।।

অতঃ বিবক্ষামঃ হরিদাসং বিনা সংস্কৃতসাহিত্যাকাশঃ তমসাপূর্ণঃ ভবতি। তেন বিরচিতানি কাব্যনক্ষত্রানিযণ অস্মিন্ আকাশে দেদীপয়তে।

# संस्कृत टीका
# हरिदाससिद्धान्तवागीश

यः खलु जनः समग्रजीवनं सारस्वत्यसाधनायां व्यापृतं सन् आधुनिककालस्य तमसापूर्णं संस्कृतकाव्याङ्गनम् आलोकीकृतं स हि हरिदाससिद्धान्तवागीशमहोदयः। १८७६ ईशवीयाब्दे २२ अक्टोवर इति मासाङ्के अधुना वङ्गदेशस्य फरिदपुरजिलान्तर्गते कोटालिपाडा परगणायां ऊणशियाग्रामे हरिदासमहोदयः अजायत। तस्य हि सुरी आसीत् प्रमोदपुरन्दराचार्य्य मधुसूदनसरस्वती च। हरिदासमहोदयस्य पितासीत् गङ्गाधरविद्यालङ्कारः माता च विधुमुखीदेवी।

Scanned with CamScanner

हरिदासमहोदयः एकादशे वर्षे वयसि पितामहात् काशीचन्द्रमहोदयात् कलापव्याकरणं अधीतवान्। पण्डितव्रजकुमारविद्याभूषणात् चतुष्टयवृत्तिं, पुनः पितामहात् कारकादिव्याकरणं अपठत्। पञ्चदशवर्षवयसि कलापव्याकरणस्य परीक्षायां प्रथमविभागे प्रथमः भूत्वा स 'श्वाचार्य्यः' इति उपाधिमलभत्। १३०५ वङ्गाब्दे ढाकासारस्वतसमाजस्य काव्योपाधिपरीक्षायां प्रथमः भूत्वा हरिदासमहोदयः शीतवस्त्रमेकं उपहाररूपेण प्राप्नोत्। हरिदासमहोदयः तस्य कर्मजीवने वहुसम्मानेन भऊषितः भवति। तद् यथा— पुराणशास्त्री, संख्यारत्न, सिद्धान्तवागीशः (ढाकासारस्वतसमाज), महामहोपाध्यायः (व्रिटिशसर्वकार, १९३३ ईशवीयाब्द,) पद्मभूषणम् (भारतसर्वकार, १९६०ईशवीयाब्द) इत्यादि।

हरिदासमहोदयेन तस्य कर्मजीवने वहुकाव्यानि सम्पादितानि रचितानि वा। ते यथा— **महाकाव्यम्**—रुक्मिणीहरणम्, **खण्डकाव्यानि**—वियोगवैभवम्, शङ्करसम्भवम्, विद्यावित्तविवादः। **नाटकानि**—कंसवधम्, जानकीविक्रमम्, वङ्गीयप्रतापम्, मेवारप्रतापम्, शिवाजिचरितम्, विराजसरोजिनी। **उपन्यासः**—सरला, **शास्त्राणि**—काव्यकौमुदी, स्मृतिचिन्तामणि, वौदिकविवादमीमांसा। **टीकाः**—उत्तररामचरितम्, महावीरचरितम्, मालतीमाधवम् इत्यादि।

हरिदासमहोदयः तस्य पञ्चाशीतिवर्षे कर्मजीवने संस्कृतसाहित्यं नानारूपैः शोभितम्। १९६१ ईशवीयाब्दे २६ डिसेम्बर इति मासाङ्के अस्य ज्ञानतपस्विणः कर्मयोगिनः महापुरुषस्य महाप्रयानम् अभवत्।

## হরিদাসসিদ্ধান্তবাগীশ

যঃ খলু জনঃ সমগ্রজীবনং সারস্বতসাধনায়াং ব্যাপৃতং সন্ আধুনিককালস্য তমসাপূর্ণং সংস্কৃতকাব্যাঙ্গনম্ আলোকীকৃতং স হি হরিদাসসিদ্ধান্তবাগীশমহোদয়ঃ। ১৮৭৬ ঈশবীয়াব্দে ২২ অক্টোবর ইতি মাসাঙ্কে অধুনা বঙ্গাদেশস্য ফরিদপুরজিলান্তর্গতে কোটালিপাড়া পরগণায়াং ঊণশিয়াগ্রামে হরিদাসমহোদয়ঃ অজায়ত। তস্য হি সুরী আসীৎ প্রমোদপুরন্দরাচার্য্য মধুসূদনসরস্বতী চ। হরিদাসমহোদয়স্য পিতাসীৎ গঙ্গাধরবিদ্যালঙ্কারঃ মাতা চ বিধুমুখীদেবী।

হরিদাসমহোদয়ঃ একাদশে বর্ষে বয়সি পিতামহাৎ কাশীচন্দ্রমহোদয়াৎ কলাপব্যাকরণং অধীতবান্। পণ্ডিতব্রজকুমারবিদ্যাভূষণাৎ চতুষ্টয়বৃত্তিং, পুনঃ পিতামহাৎ কারকাদিব্যাকরণং

Scanned with CamScanner

অপঠৎ। পঞ্চদশবর্ষবয়সি কলাপব্যাকরণস্য পরীক্ষায়াং প্রথমবিভাগে প্রথমঃ ভূত্বা স 'শ্বাচার্য্যঃ' ইতি উপাধিমলভৎ। ১৩০৫ বঙ্গাব্দে ঢাকাসারস্বতসমাস্য কাব্যোপাধিপরীক্ষায়াং প্রথমঃ ভূত্বা হরিদাসমহোদয়ঃ শীতবস্ত্রমেকং উপহাররূপেণ প্রাপ্নোৎ। হরিদাসমহোদয়ঃ তস্য কর্মজীবনে বহুসম্মানেন ভূষিতো ভবতি। তদ্ যথা—পুরাণশাস্ত্রী, সংখ্যারত্ন, সিদ্ধান্তবাগীশঃ (ঢাকাসারস্বতসমাজ), মহামহোপাধ্যায় (ব্রিটিশসর্বকার, ১৯৩৩ ঈশবীয়াব্দ), পদ্মভূষণম্ (ভারতসর্বকার, ১৯৬০ ঈশবীয়াব্দ) ইত্যাদি।

হরিদাসমহোদয়েন তস্য কর্মজীবনে বহুকাব্যানি সম্পাদিতানি রচিতানি বা। তে যথা— **মহাকাব্যম্**—রুক্মিণীহরণম্, **খণ্ডকাব্যানি** —বিয়োগবৈভবম্, শঙ্করসম্ভবম্, বিদ্যাবিত্তবিবাদঃ। **নাটকানি**— কংসবধম্, জানকীবিক্রমম্, বঙ্গীয়প্রতাপম্, মেবারপ্রতাপম্, শিবাজিচরিতম্, বিরাজসরোজিনী। **উপন্যাসঃ**—সরলা, **শাস্ত্রাণি**—কাব্যকৌমুদী, স্মৃতিচিন্তামণি, বৈদিকবিবাদমীমাংসা। **টীকাঃ**—উত্তররামচরিতম্, মহাবীরচরিতম্, মালতীমাধবম ইত্যাদি।

হরিদাসমহোদয়েন তস্য পঞ্চাশীতিবর্ষে কর্মজীবনে সংস্কৃতসাহিত্যং নানারূপৈ শোভিতম্। ১৯৬১ ঈশবীয়াব্দে ২৬ ডিসেম্বর ইতি মাসাঙ্কে অস্য জ্ঞানতপস্বিণঃ কর্মযোগিনঃ মহাপুরুষস্য মহাপ্রয়ানম্ অভবৎ।

# रुक्मिनीहरणम्

श्रीहरिदाससिद्धान्तवागीशमहोदयेन स्वीयकाव्यभावावेगेन रचितमिदं महाकाव्यं 'रुक्मिनीहरणम्'। महाभारतस्थिते श्रीकृष्णेन रुक्मिन्याः हरणमेव अस्य षोडशसर्गविशिष्टस्य महाकाव्यस्य उपजीव्यम्। महाकाव्यमिदं १९१० ईशवीयाव्दे रचितमपि १९३४ ईशवीयाब्दे काव्यमिदं प्रकाशितम्।

महाभारतस्य विषयः श्रीहरिदासमहाशयस्य पूतहस्तस्पर्शेन नवीनरूपेण परिवेशितः। रुक्मिन्याः विद्याग्रहणम्, चतुर्थसर्गे नारदेन वाणप्रस्थाभिलासिनः विदर्भराज भीष्मकस्य समीपे रुक्मिनीकृष्णयोः विवाहप्रस्तावम्। षष्ठसर्गे रुक्मिन्याः श्रीकृष्णसमीपे प्रेमपत्रप्रेरणम्, अष्टमसर्गे कञ्चुकीकृष्णयोः संलापः, नवमसर्गे विदर्भाभिमुखं गमनम्, एकादशसर्गे शृङ्गारः, द्वादशसर्गे शिशुपालस्य आगमनम्, त्रयोदशसर्गे श्रीकृष्णेन रुक्मिनीहरणम्, पञ्चदशसर्गे रुक्मिन्याः ज्येष्ठभ्रातुः रुक्म्याः पराजयः, परिशेषे षोडशसर्गे द्वारकायां राक्षसविवाहेन आवद्धयोः रुक्मिनीकृष्णयोः अभ्यर्थना वर्णिता।

विदर्भराजभीष्मकस्य पुत्र, कन्या च रुक्मिनी। श्रीकृष्णः रुक्मिनी च

प्रणयापाशेन आवद्धः, किन्तु रुक्मी जरासन्धस्य परामर्शेन शिशुपालेन सह स्वीयभगीन्याः विवाहं प्रदातुम् इच्छति। विषयोऽयं ज्ञात्वा श्रीकृष्णः परिकल्पनापूर्वकं दन्तवक्रशिशुपालादीनान् पराजित्य रुक्मिनीं हृतवान्, तौ च परिणयपाशेन आवद्धौ।

सर्गवन्धो महाकाव्यं तत्रैकः नायकः शूरः। इत्यादि अलङ्कारशास्त्रवचनानुसारेण रचितमिदं महाकाव्यम्। काव्येऽस्मिन् प्रयोगःअपि कृतः। अत्र श्रीहरिदासमहोदयस्य कविप्रतिभायाः नैसर्गिकीप्रतिभायाः, शास्त्रनिपुनताया, इत्यादिनां मधुरसमावेशाः साधिताः। संस्कृतसाहित्यस्य श्रेष्ठमहाकाव्येषु अन्यतममिदं महाकाव्यम्।

## রুক্মিনীহরণম্

শ্রীহরিদাসসিদ্ধান্তবাগীশমহোদয়েন স্বীয়কাব্যভাবাবেগেন রচিতমিদং মহাকাব্যং 'রুক্মিনীহরণম্'। মহাভারতস্থিতে শ্রীকৃষ্ণেন রুক্মিন্যাঃ হরণমেব অস্য ষোড়শসর্গবিশিষ্টস্য মহাকাব্যস্য উপজীব্যম্। মহাকাব্যমিদং ১৯১০ ঈশবীয়াব্দে রচিতমপি ১৯৩৪ ঈশবীয়াব্দে কাব্যমিদং প্রকাশিতম্।

মহাভারতস্য বিষয়ঃ শ্রীহরিদাসমহাশয়স্য পূতহস্তস্পর্শেন নবীনরূপেণ পরিবেশিতঃ। আলোচ্যমানস্য মহাকাব্যস্য প্রথমসর্গে রুক্মিন্যাঃ জন্মবৃত্তান্তম্, দ্বিতীয়ে সর্গে বিদর্ভরাজকন্যায়াঃ রুক্মিন্যাঃ বিদ্যাগ্রহণম্, চতুর্থসর্গে নারদেন বাণপ্রস্থাভিলাসিনঃ বিদর্ভরাজ ভীষ্মকস্য সমীপে রুক্মিনীকৃষ্ণয়োঃ বিবাহপ্রস্তাবম্। ষষ্ঠসর্গে রুক্মিন্যাঃ শ্রীকৃষ্ণসমীপে প্রেমপত্রপ্রেরণম্, অষ্টমসর্গে কঞ্চুকীকৃষ্ণয়োঃ সংলাপঃ নবমসর্গে বিদর্ভাভিমুখং গমনম্, একাদশসর্গে শৃঙ্গারঃ, দ্বাদশসর্গে শিশুপালস্য আগমনম্, ত্রয়োদশসর্গে শ্রীকৃষ্ণেন রুক্মিনীহরণম্, পঞ্চদশসর্গে রুক্মিন্যাঃ জ্যেষ্ঠভ্রতুঃ রুক্ম্যাঃ পরাজয়ঃ, পরিশেষে ষোড়শসর্গে দ্বারকায়াং রাক্ষসবিবাহেন আবদ্ধয়োঃ রুক্মিনীকৃষ্ণয়োঃ অভ্যর্থনা বর্ণিতা।

বিদর্ভরাজভীষ্মকস্য পুত্রঃ রুক্মী, কন্যা চ রুক্মিনী। শ্রীকৃষ্ণঃ রুক্মিনী চ প্রণয়াপাশেন আবদ্ধঃ, কিন্তু রুক্মী জরাসন্ধস্য পরামর্শেন শিশুপালেন সহ স্বীয়ভগীন্যাঃ বিবাহং প্রদাতুম্ ইচ্ছতি। বিষয়োঽয়ং জ্ঞাত্বা শ্রীকৃষ্ণঃ পরিকল্পনাপূর্বকং দন্তবক্রশিশুপালাদীনান্ পরাজিত্য রুক্মিনীং হৃতবান্, তৌ চ পরিণয়পাশেন আবদ্ধৌ।

সর্গবন্ধো মহাকাব্যং তত্রৈকঃ নায়কঃ শূরঃ। ইত্যাদি অলঙ্করশাস্ত্রবচনানুসারেণ রচিতমিদং মহাকাব্যম্। কাব্যেঽস্মিন্ প্রয়োগঃঅপি কৃতঃ। অস্মিন্ শ্রীহরিদাসমহোদয়স্য কবিপ্রতিভায়াঃ নৈসর্গিকীপ্রতিভায়াঃ, শাস্ত্রনিপুনতায়াঃ, ইত্যাদিনাং মধুরসমাবেশাঃ সাধিতাঃ। সংস্কৃতসাহিত্যস্য শ্রেষ্ঠমহাকাব্যেষু অন্যতমমিদং মহাকাব্যম্।

Scanned with CamScanner

# वङ्गीयप्रतापम्

श्रीहरिदाससिद्धान्तवागीशमहोदयेन विरचितेषु नाटकेषु अन्यतममिदं नाटकं 'वङ्गीयप्रतापम्'। अधुना वङ्गदेशस्य 'यशोर' इति प्रसिद्धस्थानस्य स्वाधीनचेतसः राज्ञः प्रतापादित्यस्य ऐतिहासिकवीरत्वव्यञ्जककथा अत्र चित्रिता। यशोरस्य इतिहासविषये लेखकः संम्यगवहितासीत्। तेनोक्तम्— 'मया तु सम्भवति स्याश्रयेन मिथ्याश्रयणमन्याष्यमिति..... इतिहासमनुरतैव नाटकमिदं निरमायि'। १९१८ ईशवीयाब्दे नाटकमिदं लिखितम् १९४६ ईशवीयाब्दे च प्रकाशितम्।

अष्टाङ्केषु निवद्धामिदं नाटकम्। अत्र वीररसः शृङ्गाररसश्च अङ्गीरसरूपेण व्यवहृतः, रौद्रहास्यादि च अङ्गरूपेण। साहित्यदर्पणानुसारेण अस्य नाटकस्य प्रस्तावना उद्घातकाश्रिता। नायकः धीरोदात्तः। अस्य प्रथमाङ्के अर्थोपक्षेपकस्य चतुर्थाङ्के विष्कम्भकस्य प्रयोगः आसीत्।

अङ्कानुसारेण विषयः—प्रथमाङ्कस्य नाम सहायलाभः। वङ्गीयशङ्कररचक्रवर्त्तिना सह यशोरराजेन प्रतापादित्येन देशात् मुघलविताडनस्य प्रतिज्ञा कृता। द्वितीयाङ्कः—द्वितीयाङ्कस्य नाम विहङ्गनिपातः। अत्र साधारणसरलालसभक्तिभावयुक्तस्य विक्रमादित्यस्य चरित्रम्। तस्य भ्रातुष्पुत्रस्य वसन्तरायस्य कुटिलता, इत्यागि वर्णिता। तृतीयाङ्कः—कल्याणपरित्राणनामा तृतीयाङ्कः। अत्र शङ्करस्य सुन्दरभार्यया: कल्यनाः मोगलहस्तात् उन्मोचनस्य कथा वर्णिता। चतुर्थाङ्कः—राज्यलाभनामा चतुर्थाङ्के प्रतापादितः यशोरस्य अधीश्वररूपेण प्रतिष्ठितवान्। मोगलसम्राट् आकवरोऽपि त्वं स्वीकरोत्। पञ्चमाङ्कः—वङ्गेशविजयनामा पञ्चमाङ्के प्रतापादित्यस्य वङ्गदेशविजयस्य कथा प्रतापादित्यस्य राज्याभिषेकं वर्णितम्। सप्तमाङ्कः—दुर्जननिधनेति सप्तमाङ्कस्य नाम। मोगलपक्षावलम्बकारिणः मानसिंहस्य पुत्रेण दुर्जनसिंहेन सह प्रतापादितस्य पुत्रस्य युद्धः, युद्धे प्रतापपुत्रस्य उदयादितस्य विजयः वर्णितः। अष्टमाङ्क— प्रतापविजयेति अष्टमाङ्के मोघलसेनानां पराजित्य प्रतापादित्यस्य विजयो वर्णितः।

Scanned with CamScanner

नाटकमिदं कलिकातायाम्, कवेः जन्मस्थाने ऊनाशियाग्रामे, आसामप्रदेशे, गौरीपुरप्रदेशे सफलभावेन मञ्चस्थम्। विभिन्नविश्वविद्यालयस्य पाठ्यक्रमेऽपि नाटकमिदमन्तर्भूक्तम्।

## বঙ্গীয়প্রতাপম্

শ্রীহরিদাসসিদ্ধান্তবাগীশমহোদয়েন বিরচিতেষু নাটকেষু অন্যতমমিদং নাটকং 'বঙ্গীয়প্রতাপম্'। অধুনা বঙ্গদেশস্য 'যশোর' ইতি প্রসিদ্ধস্থানস্য স্বাধীনচেতসঃ রাজ্ঞঃ প্রতাপাদিত্যস্য ঐতিহাসিকবীরত্বব্যঞ্জককথা অত্র চিত্রিতা। যশোরস্য ইতিহাসবিষয়ে লেখকঃ সম্যগবহিতাসীৎ। তেনোক্তম্— 'ময়া তু সম্ভবতি সত্যাশ্রয়েন মিথ্যাশ্রয়ণমন্যায্যমিতি...... ইতিহাসমনুসরতৈব নাটকমিদং নিরমায়ি'। ১৯১৮ ঈশবীয়াব্দে নাটকমিদং লিখিতম্ ১৯৪৬ ঈশবীয়াব্দে চ প্রকাশিতম্।

অষ্টাঙ্কেষু নিবদ্ধমিদং নাটকম্। অত্র বীররসঃ শৃঙ্গাররসশ্চ অঙ্গীরসরূপেণ ব্যবহৃতঃ, রৌদ্রহাস্যাদি চ অঙ্গরূপেণ। সাহিত্যদর্পণানুসারেণ অস্য নাটকস্য প্রস্তাবনা উদ্‌ঘাতকাশ্রিতা। নায়কঃ চ ধীরোদাত্তঃ। অস্য প্রথমাঙ্কে অর্থোপক্ষেপকস্য চতুর্থাঙ্কে বিষ্কম্ভকস্য প্রয়োগঃআসীৎ।

অঙ্কানুসারেণ বিষয়ঃ—প্রথমাঙ্কস্য নাম সহায়লাভঃ। বঙ্গীয়শঙ্করচক্রবর্ত্তিনা সহ যশোররাজেন প্রতাপাদিত্যেন দেশাৎ মুঘলবিতাড়নস্য প্রতিজ্ঞা কৃতা। দ্বিতীয়াঙ্কঃ—দ্বিতীয়াঙ্কস্য নাম বিহঙ্গনিপাতঃ। অত্র সাধারণসরলালসভক্তিভাবযুক্তস্য বিক্রমাদিত্যস্য চরিত্রম্। তস্য ভ্রাতুষ্পুত্রস্য বসন্তরায়স্য কুটিলতা, ইত্যাদি বর্ণিতা। তৃতীয়াঙ্কঃ—কল্যাণপরিত্রাণনামা তৃতীয়াঙ্কঃ। অত্র শঙ্করস্য সুন্দরভার্যয়াঃ কল্যনাঃ মোগলহস্তাৎ উন্মোচনস্য কথা বর্ণিতা। চতুর্থাঙ্কঃ— রাজ্যলাভনামা চতুর্থাঙ্কে প্রতাপাদিত্যঃ যশোরস্য অধীশ্বররূপেণ প্রতিষ্ঠিতবান্। মোগলসম্রাট্ আকবরোঽপি ত্বং স্বীকরোৎ। পঞ্চমাঙ্কঃ— বঙ্গেশবিজয়নামা পঞ্চমাঙ্কে প্রতাপাদিত্যস্য বঙ্গদেশবিজয়স্য কথা প্রতাপাদিত্যস্য রাজ্যাভিষেকঃ বর্ণিতঃ। সপ্তমাঙ্কঃ—দুর্জননিধনেতি সপ্তমাঙ্কস্য নাম। মোগলপক্ষাবলম্বকারিণঃ মানসিংহস্য পুত্রেণ দুর্জনসিংহেন সহ প্রতাপাদিতস্য পুত্রস্য যুদ্ধঃ, যুদ্ধে প্রতাপপুত্রস্য উদয়াদিতস্য বিজয়ঃ বর্ণিতঃ। অষ্টমাঙ্ক—প্রতাপবিজয়েতি অষ্টমাঙ্কে মোঘলসেনাঃ পরাজিত্য প্রতাপাদিত্যস্য বিজয় বর্ণিতঃ।

নাটকমিদং কলিকাতায়াম্, কবেঃ জন্মস্থানে উনাশিয়াগ্রামে, আসামপ্রদেশে, গৌরীপুরপ্রদেশে সফলভাবেন মঞ্চস্থম্। বিভিন্ন বিশ্ববিদ্যালয়স্য পাঠ্যক্রমেঽপি নাট্কমিদমন্তর্ভূক্তম্।

# मिवारप्रतापम्

श्रीहरिदाससिद्धान्तवागीशमहोदयेन विरचितमिदं देशभक्तिमूलकं 'मिवारप्रतापम्' नाटकम्। मेवारराजस्य प्रतापसिंहस्य (१५७२—१५९७) देशप्रेमोज्ज्वलकथाविषयं अस्य नाटकस्य मूलम्। नाटकस्य नायकः मेवारस्य राजा प्रतापसिंहः। वीररसः एव अस्मिन् अङ्गीरसरूपेण परिवेशितः।

षष्ठाङ्केषु निवद्धमिदं नाटकम्। अङ्कानुसारेण विषयः यथा—प्रथमाङ्कस्य नाम प्रतिज्ञा। आकवरराणाप्रतापयोः सन्ध्यर्थम् आगतस्य अपमानितस्य आकवरसेनान्याः मानसिंहस्य प्रतिज्ञा वर्णिता—

यदमुष्य प्रतीकारं न कुर्य्यां वीर्य्यवानपि।
तदाम्बरं नयास्यामि यास्याम्बरतां पुनं ।।

पुनः राणाप्रतापः तथा तस्य भिल्लोति सेनानां प्रतिज्ञा—मोगलविताडनं न कृते ते सुखं नानुभवन्। कमलाकौशलेति द्वितीयाङ्के आकवरस्य सभाकवेः पृथ्वीराजस्य धीमतीपत्न्याः कमलायाः प्रतिज्ञापालनपूर्वकं तस्याः सम्मानरक्षा धीमतीपत्न्याः कमलायाः प्रतिज्ञापालनपूर्वकं तस्याः सम्मानरक्षा वर्णिता। मिवारप्रयानामा तृतीयाङ्के मानसिंहेन सह आकवरस्य ज्येष्ठपुत्रस्य मिवाराभियानं वर्णितम्। चतुर्थाङ्कस्य नाम प्रतापपराजयः। अस्मिन् मोगलैः सह राजपुतानां युद्धः, 'हलदिघाटः' इत्यस्मिन् युद्धे प्रतापस्य पराजयः झालापतेः आत्मत्यागः, प्रभुभक्तोऽस्यचेतकस्य मृत्युः, युद्धक्षेत्रात् प्रतापस्य पलायनम्, प्रतापं प्रति शक्तिसिंहस्य परामर्शः इत्यादयः विषयाः वर्णिताः। वनवासेति पञ्चमाङ्के गिरिप्रदेशे स्वपरिवारपालने, अन्नसंस्थाने असमर्थस्य प्रतापस्य दुरवस्था, क्षुधार्तकन्याया इन्द्रियाः कष्टं सोढूम् असमर्थस्य प्रतापस्य आकवरसमीपे सन्ध्यर्थं चिन्ता, किन्तु स किं करिष्यति, किं न करिष्यति इत्यादौ नाटकीयोत्कण्ठायाम् अङ्कस्य परिसामप्तिः। द्वात्रिंशद्दुर्गविजयानामा षष्टाङ्के राणाप्रतापस्य हस्तयोः अर्थसाहाय्येन प्रतापसिंहः देवीदुर्गेन सह द्वात्रिंशसंख्यकान् दुर्गान् विजितवान्। अन्तिमे गुरोः आशीर्वादेन, सह

भरतवाक्येन नाटकस्य परिसमाप्तिः।

१९४५ ईशवीयाब्दे उत्तरकलिकातायाः स्टाररङ्गमञ्चे नाटकमिदं आदौ अभिनितम्।

## मिबारप्रतापम्

শ্রীহরিদাসসিদ্ধান্তবাগীশমহোদয়েন বিরচিতমিদং দেশভক্তিমূলকং 'মিবারপ্রতাপম্' নাটকম্। মেবাররাজস্য প্রতাপসিংহস্য (১৫৭২-১৫৯৭) দেশপ্রেমোজ্জ্বলকথাবিষয়ং অস্য নাটকস্য মূলম্। নাটকস্য নায়কঃ মেবারস্য রাজা প্রতাপসিংহঃ। বীররসঃ এব অস্মিন্ অঙ্গীরসরূপেণ পরিবেশিতঃ।

ষষ্ঠাঙ্কেষু নিবদ্ধমিদং নাটকম্। অঙ্কানুসারেণ বিষয়ঃ যথা— প্রথমাঙ্কস্য নাম প্রতিজ্ঞা। আকবররাণাপ্রতাপয়োঃ সন্ধ্যর্থম্ আগতস্য অপমানিতস্য আকবরসেনান্যঃ মানসিংহস্য প্রতিজ্ঞা বর্ণিতা— যদমুষ্য প্রতীকারং ন কুর্য্যাং বীর্য্যবানপি।
তদাম্বরং ন যাস্যামি যাস্যাম্বরতাং পুনং।।

পুনঃ রাণাপ্রতাপঃ তথা তস্য ভিল্লোতি সেনানাং প্রতিজ্ঞা—মোগলবিতাড়নং ন কৃতে তে সুখং নানুভবন্। কমলাকৌশলেতি দ্বিতীয়াঙ্কে আকবরস্য সভাকবেঃ পৃথ্বীরাজস্য ধীমতীপত্ন্যাঃ কমলায়াঃ প্রতিজ্ঞাপালনপূর্বকং তস্যাঃ সম্মানরক্ষা ধীমতীপত্ন্যাঃ কমলায়াঃ প্রতিজ্ঞাপালনপূর্বকং তস্যাঃ সম্মানরক্ষা বর্ণিতা। মিবারপ্রয়ানামা তৃতীয়াঙ্কে মানসিংহেন সহ আকবরস্য জ্যেষ্ঠপুত্রস্য মিবারাভিযানং বর্ণিতম্। চতুর্থাঙ্কস্য নাম প্রতাপপরাজয়ঃ। অস্মিন্ মোগলৈঃ সহ রাজপুতানাং যুদ্ধঃ, 'হলদিঘাটঃ' ইত্যস্মিন্ যুদ্ধে প্রতাপস্য পরাজয়ঃ ঝালাপতেঃ আত্মত্যাগঃ, প্রভুভক্তোঽস্যচেতকস্য মৃত্যুঃ, যুদ্ধক্ষেত্রাৎ প্রতাপস্য পলায়নম্, প্রতাপং প্রতি শক্তিসিংহস্য পরামর্শঃ ইত্যাদয়ঃ বিষয়াঃ বর্ণিতাঃ। বনবাসেতি পঞ্চমাঙ্কে গিরিপ্রদেশে স্বপরিবারপালনে, অন্নসংস্থানে অসমর্থস্য প্রতাপস্য দুরবস্থা, ক্ষুধার্তকন্যায়া ইন্দ্রিয়াঃ কষ্টং সোঢুম্ অসমর্থস্য প্রতাপস্য আকবরসমীপে সন্ধ্যর্থং চিন্তা, কিন্তু স কিং করিষ্যতি, কিং ন করিষ্যতি ইত্যাদৌ নাটকীয়োৎ কণ্ঠায়াম্ অঙ্কস্য পরিসমাপ্তিঃ। দ্বাত্রিংশদ্দুর্গবিজয়ানামা ষষ্ঠাঙ্কে রাণাপ্রতাপস্য হস্তয়োঃ অর্থসাহায্যেন প্রতাপসিংহঃ দেবীদুর্গেন সহ দ্বাত্রিংশসংখ্যকান্ দুর্গান্ বিজিতবান্। অন্তিমে গুরোঃ আশীর্বাদেন, সহ ভরতবাক্যেন নাটকস্য পরিসমাপ্তিঃ।

১৯৪৫ ঈশবীয়াব্দে উত্তরকলিকাতায়াঃ স্টাররঙ্গমঞ্চে নাটকমিদং আদৌ অভিনীতম্।

## शिवाजीचरितम्

महामहोपाध्यायेन हरिदाससिद्धान्तवागीशमहोदयेन १९४३ ईशवीयाब्दे

रचितमिदं 'शिवाजीचरितम्' इति दशाङ्कविशिष्टं महानाटकम्। छत्रपतेः शिवाजियः वीरगाथामवबलम्बने रचितमिदम्। नाट्यकारः अपि निवेदनांशे वदति यद्यपि नाटकीयकथा सामान्या परिवर्त्तिता तथापि ऐतिहासिकतथ्यसमूहा अक्षुन्ना आसीत्— 'किन्तु प्रायेनैव यथायथमितिहासमनुरता वृत्तान्तपरिवृत्तिमकुर्वता'।

अङ्कानुसारेण नाटकीयविषयः—

प्रथमाङ्क (सङ्घटनम्)—आलोच्यमाने अङ्के शिवाजी मित्रेभ्यः वदति शास्त्रपाठेन यौवनस्य महामूल्यसमयं न नशित्वा शस्त्रधारणेन मातृभूमिं रक्षा करणीया। अनेन सर्वेः संघवद्धाः आसन्।

द्वितीयङ्कः (तोरणदुर्गाधिकारः)—केन प्रकारेण छद्मवेशेन शिवाजीया तोरणदुर्गः अधिकृतः तत् वर्णितात्र।

तृतीयाङ्कः (शाहनाथवन्दीकपण)—तोरणदुर्गे अधिकृते ईर्शान्वितेन विजापुरशासकेन नादिरशाहेन शिवाजियः पितरं शाहनाथं वन्दी कृता।

चतुर्थाङ्कः—पितुः मुक्त्यर्थं शिवाजीः भिन्नेषु दुर्गेषु वन्दीकृतान् सैन्यान् मुक्तम् अकरोत्।

पञ्चमाङ्कः— विजापुरसुलतानेन प्रेषितेन सेनानायकेन आफजलेन सह शिवाजिनः विजयः वर्णितः।

षष्ठाङ्कः (पुन्यपत्तनविजसः) शिवाजीः भास्करवर्मां जीतवान्।

सप्तमाङ्कः— औरङ्गजेवस्य निमन्त्रणप्राप्तः शिवाजी मोघलदरवारे अपमानितं वन्दीं च अभवत्।

अष्टमाङ्कः— धीमान् शिवाजी परिकल्पनापूर्वकं कारागारात् पलायितवान्।

नवमाङ्क (विजय)—मुगलसेनाध्यक्षं मुर्दनसिंहं विजित्य शिवाजीः स्वाधीनरहट्टाशासकरूपेण परिचितम् अभवत्।

दशमाङ्क (शिवान्दराज्याभिषेकः)—अन्तिमाङ्के औरङ्गजेवेन शिवाजीः राजारूपेण स्वीकृतः। सर्वेषां समीपे रायदुर्गे तस्य राज्याभिषेकं अभवत्। नायकस्य भरतवाक्योच्चारणेन नाटकमिदं परिसमाप्तम्।



Scanned with CamScanner

वीररसाश्रितं नाटकमिदं अभिनययोग्यम् स्वदेशे चेतनासमृद्धं च। श्रीहरिदासमहोदस्य देशभक्तिः नाटकमिदं पाठेन परिज्ञायते।

## শিবাজীচরিতম্

মহামহোপাধ্যায়েন হরিদাসসিদ্ধান্তবাগীশমহোদয়েন ১৯৪৩ ঈশবীয়াব্দে রচিতমিদং 'শিবাজীচরিতম্' ইতি দশাঙ্কবিশিষ্টং মহানাটকম্। ছত্রপতেঃ শিবাজিয়ঃ বীরগাথামবলম্বনেন রচিতমিদম্। নাট্যকারঃ অপি নিবেদনাংশে বদতি যদ্যপি নাটকীয়কথা সামান্যা পরিবর্ত্তিতা তথাপি ঐতিহাসিকতথ্যসমূহা অক্ষুন্না আসীৎ— ' কিন্তু প্রায়েণৈব যথাযথমিতিহাসমনুরতা বৃত্তান্তপরিবৃত্তিমকুর্বতা'।

অঙ্কানুসারেণ নাটকীয়বিষয়ঃ—

প্রথমাঙ্কঃ (সঙ্ঘটনম্)ঃ— আলোচ্যমানে অঙ্কে শিবাজী মিত্রেভ্যঃ বদতি শাস্ত্রপাঠেন যৌবনস্য মহামূল্যসময়ং ন নশিত্বা শস্ত্রধারণেন মাতৃভূমিং রক্ষা করণীয়া। অনেন সর্বেঃ সংঘবদ্ধাঃ আসন্।

দ্বিতীয়ঙ্কঃ (তোরনদুর্গাধিকার) ঃ— কেন প্রকারেণ ছদ্মবেশেন শিবাজীনা তোরণদুর্গঃ অধিকৃতঃ তৎ বর্ণিতাত্র।

তৃতীয়াঙ্কঃ ( শাহনাথবন্দীকরণ) ঃ— তোরণদুর্গে অধিকৃতে ঈর্শান্বিতেন বিজাপুরশাসকেন নাদিরশাহেন শিবাজিয়ঃ পিতরং শাহনাথং বন্দী কৃতা।

চতুর্থাঙ্কঃ —পিতুঃ মুক্ত্যর্থং শিবাজীঃ ভিন্নেষু দুর্গেষু বন্দীকৃতান্ সৈন্যান্ মুঞ্চয়তি।

পঞ্চমাঙ্কঃ— বিজাপুরসুলতানেন প্রেষিতেন সেনানায়কেন আফজলেন সহ শিবাজিনঃ যুদ্ধে শিবাজিয়ঃ বিজয়ঃ বর্ণিতঃ।

ষষ্ঠাঙ্কঃ (পুন্যপত্তনবিজয়ঃ)—শিবাজীঃ ভাস্করবর্মাং জীতবান্।

সপ্তমাঙ্ক ঃ –– ঔরঙ্গজেবস্য নিমন্ত্রণপ্রাপ্তঃ শিবাজী মোঘলদরবারে অপমানিতং বন্দীং চ অভবৎ।

অষ্টমাঙ্কঃ— ধীমান্ শিবাজী পরিকল্পনাপূর্বকং কারাগারাৎ পলায়িতবান্।

নবমাঙ্ক (বিজয়)— মুগলসেনাধক্ষ্যং মুর্দনসিংহং বিজিত্য শিবাজীঃ স্বাধীনরহট্টাশাসকরূপেণ পরিচিতং অভবৎ।

দশমাঙ্ক (শিবান্দরাজ্যাভিষেকঃ)—অন্তিমাঙ্কে ঔরঙ্গাজেবেন শিবাজীঃ রাজারূপেণ স্বীকৃতঃ। সর্বেষাং সমীপে রায়দুর্গে তস্য রাজ্যাভিষেকম্ অভবৎ। নায়কস্য ভরতবাক্যোচ্চারণেন নাটকমিদং পরিসমাপ্তম্।

বীররসাশ্রিতং নাটকমিদং অভিনয়যোগ্যম্ স্বদেশ চেতনাসমৃদ্ধং চ। শ্রীহরিদাসমহোদয়স্য দেশভক্তিঃ নাটকমিদং পাঠেন পরিজ্ঞায়তে।

Scanned with CamScanner